## चतुर्दशः पाठः

# साहसे श्रीर्वसति

**आधुनिकयुगेऽपि संस्कृते कथालेखनं पूर्ववच्चलति। एकोनविंशशताब्द्यां श्रीमल्लक्ष्मणशास्त्रितैलङ्ग महोदयेन सिन्धुवादवृत्तमिति शीर्षकेन साहसीसिन्धुवादस्य सप्तसैन्धवयात्राणां वर्णनं कृतम्।**

**सङ्कलितोऽयमंशः ग्रन्थस्य तृतीययात्रावृत्तान्तात् सङ्गृहीतः। अंशेऽस्मिन् सार्थवाहः सिन्धुवादः स्वकीय यात्रावृत्तान्तं श्रावयन् कथयति यत् नाहं दैवबलात् धनसम्पन्नः। मया प्राणान् सङ्कटे निक्षिप्य साहसपराक्रमबुद्धिचातुर्यद्वारा धनमर्जितम्।**

आर्याः! नन्वयं द्वीपः काष्ठप्रचुरः तत्तेभ्यः फलकानि सम्पाद्य क्वचिद् गूढं निक्षिप्य तदुपयोगौपयिकमवसरं प्रतीक्षेमहि। मया ह्यस्य पुरुषहतकस्य विनाशायैक उपायश्चिन्तितः। तस्मिन् किल साफल्यमुपगते सधैर्यमत्रैव कमपि पोतं सम्भाव्यागममनुपालयन्तः कालं क्षपयेम। अन्यथा तु फलकाश्रयेण समुद्रमाश्रयेम। अपाय बहुलमपि फलकाश्रयेण सिन्धुतरणं नूनमेतन्नरपिशाचमुखकन्दराप्रवेशाच्छ्रेय इति।

सायं च स्ववसतिं भूयः प्रत्यगच्छाम। सोऽपि नररूपधरोऽन्तको यथासमयमुपेत्यास्मास्वेकं जग्ध्वा निनद्रौ। तं च सघर्घरस्वनं निद्रावशमाकलय्यास्मासु धीरधियो नवजना अहं च लोहशूलमग्नौ प्रताप्य तच्चक्षुषि निक्षिप्य तमन्धतामनयाम।

सोऽप्यविषह्यवेदनया भृशं तुद्यमानस्तारमाक्रोशन् दूरे स्थितेष्वस्मासु कञ्चन विधर्तुं कृतप्रयत्नोऽपि वन्ध्यश्रम इतस्ततः परामृशन् द्वारदेशमवाप्य कुत्रापि प्रययौ।

तस्मिंश्चापगतमात्रे वयं सिन्धुरोधो निगूहितं काष्ठफलकसमुदयमवाप्यानाकर्ण्य तद्गर्जनं तं मृतं मत्वा निर्विशङ्काः कस्यचित् प्रवहणस्यागमनं सम्भावयन्त आप्रभातमतिष्ठाम। प्रभातायां च तस्यां युगायमानायां निशायां तमस्मदरातिमात्मतुल्याकारप्रमाणाभ्यामपराभ्यां नरहतकाभ्यां समनुस्रियमाणं सत्वरमापतन्तमद्राक्ष्म।

तांश्चावलोक्य ससम्भ्रमं फलकान्यधिरुह्य तानि क्षेपणीभ्यां प्रेरयन्तः सत्वरं पलायामहि। ते तु नराधमा अस्मान्निरीक्ष्य क्रोधेन दशनान् पेषयन्तो महतीः शिला अस्मत्फलकेषु तरसाऽस्यन्तस्तानि चूर्णीकृत्य सर्वान् सिन्धुतलेऽमज्जयन्। केवलमहमुभाभ्यां सहचराभ्यां सह फलकमेकमधिरूढो नियत्या तस्या विपदोऽभिरक्षितः सिन्धुमध्यमध्यगच्छम्।

तत्र च महोर्मिषु क्वचिन्निमज्जन्तः क्वचिच्चोन्मज्जन्तो वयं दैवैकनाथाः संशयग्रस्तहृदयास्तां क्षपामक्षपयाम। प्रातश्च सुदैववशेन क्वचिद् द्वीपे क्षिप्ताः सानन्दं तत्र समृद्धा मृद्वीका यथेच्छमुपभुज्य कञ्चिच्छ्रममपानयाम।

अवतीर्णायां च निशायां तीरं सम्प्राप्य प्रसुप्ता अत्यायतप्रमाणस्याजगरस्यैकस्य विसर्पणशब्देनाऽदूरोत्थितेन प्रबुद्धा अभवाम। स चाजगरः क्षणादस्मास्वेकं भुक्तये कृतवृथाप्रयत्नं न्यगिलत्। उर्वरितैकसहचरोऽहं ''हन्त! दुःखाद्दुःखान्तरं प्राप्तौ स्वः नराशनात्कथञ्चिद्विमुक्तौ साम्प्रतं सर्पमुखमनुप्रविष्टौ'' इति जीविते निराश उच्चैराक्रन्दम्।

अथावयोर्निकटवर्तिनं शाखिनमारुह्य स्थितयोरधस्तादुपगतो महाकायोऽजगरः स्वफूत्कारवेगेन मत्तः किञ्चिदधोवर्तिन्यां शाखायां स्थितं तं मदीयमेकाकिनं सहचरं निगीर्य कुत्रापि न्यलीयत।

एवमेकावशेष आत्मनोऽपि तामेव गतिं सम्भावयन् जीवितनिराश: सिन्धौ निमज्य मर्तुकामोऽपि भूयो जीवनाशया प्रणोदितो रक्षायै परमेश्वरं भूयो भूय: प्रार्थ्यमानोऽकस्माद् दूरादागच्छत् प्रवहणमेकमपश्यम्। शिर:स्थ पटेन च कृत-सङ्केतस्तत्स्थजनावधानमाकृष्य गृहीतसङ्केतै: पोतवाहै: सपदि सम्प्रेषितां नावमेकामारुह्य पोतं संप्राप्नुवम्।

तैश्च सहित: कानिचिदहानि द्वीपान्तरेषु वाणिज्यया द्रविणमुपार्जनयन् सालहतं नाम चन्दनद्रुमप्रभवं द्वीपमुपागत्य सङ्ग्रहीतप्रचुरचन्दनस्तत: प्रस्थातुकाम: पोताध्यक्षेणैवमुक्त:—

''आर्य! एतानि पण्यवस्तूनि मत्पोतमारूढपूर्वस्य मार्गे दैवान्मृतस्यैकस्य वणिक्श्रेष्ठस्य विक्रीयाखिलं तद्धनं विदामपुरं सम्प्राप्तेन भवता तत्दायदेभ्यो दीयमानमभ्यर्थये।''

इत्युक्त्वा स तत्पण्यजातमदर्शयत्। तथेत्यभ्युपगत्य पश्यन्नहं तेषु स्यूतेषूल्लिखितमात्मनोऽभिधानमवलोक्य पोताध्यक्षं तं द्वितीययात्रायां प्रसुप्तं मामेकाकिनं परित्यज्यपसृतं प्रत्यभिज्ञायपृच्छम्–

''आर्य! किन्नामधेयोऽसौ यस्यैतद्वस्तुजातम्?'' इति। सोऽब्रवीत्– ''भद्र! एतानि विदामपुरवासिनो वणिगग्रगण्यस्यार्य-सिन्धुवादस्य। य: किल द्वीपमेकमवतीर्य सहसाऽदृश्यतां गत इति।''

''आर्य! सोऽहं सिन्धुवादो यं भवांस्तस्मिन् द्वीपे एकाकिनं सुप्तं परित्यज्यापयात'' इति ब्रुवाणं मां क्षणं निर्वर्ण्य प्रत्यभिज्ञाय च प्रहृष्ट: ''आर्य! सिन्धुवाद! दिष्ट्या भवन्तं तीर्णापदं भूयो विलोकयामि'' इति समभिनन्द्य तत्पण्यजातं मदधीनमकरोत्।

ततश्च वासरपुरं सम्प्राप्य समुपार्जितापरिमितवसुविसरो दीनेभ्योऽतिसृष्टविपुलधनो विषयसुखोपभोगैकपर: सानन्दं समयमयापयम्।

## शब्दार्थ:

| | | |
|---|---|---|
| काष्ठप्रचुर: | – | अधिककाष्ठयुक्त: (अधिक लकड़ी वाला) |
| नरपिशाचमुखकन्दराप्रवेशाच्छ्रेय: | – | नरपिशाचानां मुखप्रवेशात् श्रेय: इति (इन नरपिशाचों के मुँह में जाने से अच्छा है) |
| नररूपधरोऽन्तको | – | नररूपे विद्यमान: अन्तक: (नर रूप में विद्यमान मारने वाला) |
| जग्ध्वा | – | हत्वा (मारकर) |
| लोहशूलमग्नौ | – | लोहनिर्मित शूलयुक्तौ (लोहे से बना हुआ शूल युक्त) |
| विषह्यवेदनया | – | असहनशील वेदनया (असहनशील वेदना से) |
| प्रययौ | – | गतवान् (गया) |
| निर्विशङ्का: | – | शङ्का रहिता: (शङ्का रहित) |

| | | |
|---|---|---|
| तमस्य दरातिमात्मतुल्याकारप्रमाणाभ्यामपराभ्याम् | – | तम् अस्मदरातिम् आत्मतुल्याकारकप्रमाणयुक्ताभ्याम् अस्माकं यात्रीणां शत्रुम् |
| महोर्मिषु | – | महत्तरङ्गेषु (बड़ी-बड़ी लहरों में) |
| सुदैववशेन | – | भगवत् कृपया (भगवान की कृपा से) |
| समृद्धा मृद्वीका: | – | फलितानि द्राक्षाफलानि |
| अत्यायतप्रमाणस्याजगरस्यैकस्य | – | अधिक प्रमाण युक्त वृहत् सर्पस्य / अधिक प्रमाण वाला एक साँप (अजगर का) |
| निगीर्य | – | कवलीकृत्य (निगल के) |
| न्यलीयत | – | निलीतवान् अभवत् (छिप गया) |
| प्रवहणम् | – | नौकां (नौका को) |
| पोतवाहै: | – | नौ चालकै: (नौका चालकों से) |
| दायदेभ्य: | – | परिजनेभ्य: (सम्बन्धियों) |
| सहसाऽदृश्यंगत: | – | अकस्मात् अदृष्टिगोचर: जात: (अकस्मात् अदृश्य हो गया) |
| तीर्णापदम् | – | आपदात् रक्षितं (आपदा से रक्षित) |

## अभ्यास:

**1. एकपदेन उत्तरत –**

क) साहसे श्रीर्वसति कथांशस्य नायक: क:?

ख) सिन्धुवाद: क: आसीत्?

ग) प्रथमद्वीपे कुत: भयमन्वभवन्?

घ) द्वितीयद्वीपे किं उपभुज्य आनन्दमनुभूतवन्त:?

ङ) सिन्धुवादस्य ग्राम: क:?

च) सालहतद्वीपे किं प्रचुरमुपलभ्यते?

**2. एकवाक्येन उत्तरत –**

क) सिन्धुवाद: अन्तत: कुत्र गतवान्?

ख) द्वितीये द्वीपे निशायां भीति: कुतो अभवत्?

ग) सिन्धुवाद: कति सहचराभ्यां प्रथमद्वीपात् कुत्र च पलायित:?

घ) नररूप: पिशाच: किं कृतवान्?

ङ) पोताध्यक्ष: सिन्धुवादं किमर्थम् अभिनन्दयामास?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत -**

क) पोताध्यक्षः सिन्धुवादं किमवोचत्?

ख) द्वितीयद्वीपे निशायां किमभवत्?

ग) नररूपराक्षसं सिन्धुवादः कथं मारितवान्?

घ) नररूपं राक्षसं हत्वा सिन्धुवादेन किं कृतम्?

ङ) सिन्धुवादः कथं रक्षितः?

4. **पदच्छेदं कृत्वा सन्धिं लिखत -**

क) नन्वयम्

ख) सोऽपि

ग) प्रवेशाच्छ्रेयः

घ) नररूपधरोऽन्तकः

ङ) अस्मदरातिम्

च) तांश्च

छ) ततश्च

5. **सन्धि-अनुसारं योजयत -**

| | | |
|---|---|---|
| क) | दूरादागच्छन् | यणादेशः |
| ख) | सोऽपि | चर्त्वसन्धिः |
| ग) | तच्चक्षुषि | परसवर्ण सन्धिः |
| घ) | एतन्नरः | पूर्वरूपसन्धिः |
| ङ) | तीर्णापदम् | श्चुत्वसन्धिः |
| च) | इत्युक्त्वा | सवर्णदीर्घः |
| छ) | प्रातश्च | जश्त्वसन्धिः |

6. **विग्रहवाक्यसहितं समासं लिखत–**

क) सानन्दम्

ख) सुदैवः

ग) नररूपपिशाचः

घ) यथासमयम्

ङ) पुरवासी

च) सधैर्यम्

7. **प्रत्ययेषु परिवर्तयत–**

| | **क्त्वा** | | **ल्यप्** |
|---|---|---|---|
| क | कृ................ | क | परा+कृ................ |
| ख | क्षिप्............. | ख | नि+क्षिप.............. |
| ग | स्था................. | ग | उत्+स्था.............. |
| घ | पठ् ............. | घ | नि + गृ............... |

8. **रिक्तस्थानानि पूरयत–**

क) द्वीपः.............तत्तेभ्यः फलकानि सम्पादयामि।

ख) .............च स्ववसतिं भूयः प्रत्यागच्छाम।

ग) अहं च...............प्रताप्य तम् अमारयम्।

घ) ...............नाम चन्दनद्रुमप्रभवं द्वीपम्।

ङ) आर्य सोऽहं...................।

च) जीवितनिराशः.................निमज्य पलायामहि।

9. **धातुरूपाणि लिखत –**

क) गम् (लट् प्रथमपुरुषः)

ख) हन् (लोट् मध्यमपुरुषः)

ग) वच् (लङ् प्रथमपुरुषः)

घ) अस् (लोट् उत्तमपुरुषः)

ङ) ज्ञा (लङ् प्रथमपुरुषः)

10. वाक्यानि रचयत -




**योग्यताविस्तारः**

- सिन्धुवादवृत्तस्य पूर्वां कथां पठत।
- एतादृशसाहसपूर्णाः कथाः संस्कृते सन्ति तर्हि ताः सङ्कलनीया पठनीया च।